अर्चिचिषति । न्द्राः इति किम् ? ईचिक्षिषते । संयोगादयः इति किम् ? प्राणिणिषति । 'अनितेः' (८.४.१९/२४७८) 'उभौ साभ्यासस्य' (८. ४. २१/२६०६) इति णत्वम् । अजादेः[1] इत्येव, दिद्रासति ।

केचिद् अजादेः [2]इत्यपि पञ्चम्यन्तं कर्मधारयमनुवर्तयन्ति । तस्य प्रयोजनम्, इन्दिद्रीयिषति [3]इति । अजादेरनन्तरत्वाभावाद् दकारो द्विरुच्यत एव, नकारो न द्विरुच्यते । इन्द्रमिच्छति इति क्यच् । तदन्तात् इन्द्रीयितुम् इच्छति इति सन् ।

[६५०] बकारस्याप्ययं[4] प्रतिषेधो वक्तव्यः ।

उब्जिजिषति । यदा बकारोपध उब्जिरु[5]पदिश्यते तदा अयं प्रतिषेधः । [6]दकारोपधोपदेशे [7]तु न वक्तव्यः । बत्वं तु दकारस्य विधातव्यम् ।

[६५१] [8]यकारपरस्य [9]रेफस्य प्रतिषेधो न भवतीति वक्तव्यम् ।

अरार्यते । अर्तेः 'अटर्यातिशूर्णोतीनामुपसंख्यानम्' (७. ४. ८२/२६३० वा.) इति[10] यङ । [11]तत्र 'यङि च' (७. ४. ३०/२६३३) इति गुणः, [12]ततो द्विर्वचनम् ।

[६५२] ईर्ष्यतेस्तृतीयस्य द्वे भवत इति वक्तव्यम् । (म.भा. ३.८)

कस्य तृतीयस्य ? केचिदाहुर्व्यञ्जनस्य इति । ईर्ष्यियिषति । अपरे पुनः तृतीयस्य एकाचः इति व्याचक्षते । ईर्ष्यिषिषति ।

[६५३] कण्ड्वादीनां तृतीयस्यैकाचो द्वे भवत इति वक्तव्यम् । (म. भा. ३. ८)

कण्डूयियिषति । असूयियिषति ।

[६५४] वा नामधातूनां तृतीयस्यैकाच द्वे भवत इति वक्तव्यम् । (म. भा. ३. ८)

अश्वीयियिषति । अशिश्वीयिषति[13] । अपर आह –

[६५५] यथेष्टं नामधातुष्विति वक्तव्यम् । (म. भा. ३. ८)

पुपुत्रीयिषति । पुतित्रीयिषति । पुत्रीयियिषति । पुपुतित्रीयियिषति । [14]पुत्रीयिषिषति ॥

---

1. द्वितीयस्यैव इत्यधिकम् क. 2. इत्यपि नास्ति फ. 3. इत्येव फ. ह. 4. अयं नास्ति फ. 5. उपगृह्यते फ. 6. दकारोपधे उपदेशे फ. 7. प्रतिषेधः फ.ह. 8. यकारात् परस्य फ. 9. रेफस्य नास्ति फ. 10. अनेन इत्यधिकम् फ. ह. 11. तत्र नास्ति फ. 12. तत्र ड. 13. इति इत्यधिकम् फ. 14. पुत्रीयिषिषति नास्ति ड. फ.